# ॥ श्रीमङ्गलचण्डिकास्तोत्रम् ॥

.. Mangalachandikastotram ..

sanskritdocuments.org

August 20, 2017

# .. Mangalachandikastotram ..

# ॥ श्रीमङ्गलचण्डिकास्तोत्रम् ॥

## Sanskrit Document Information

Text title : maNgalachaNDikAstotram

File name : mangalachaNDikAstotra.itx

Category : devii, dashamahAvidyA, stotra

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Prakash Ketkar English and Marathi translation and audio at

Proofread by : Prakash Ketkar

Description-comments : Prakruti-Khanda, BrahmaVaivarta Purana (Adhyaya 44 shloka 20-36)

Source : (<a href=”http://ioustotra.blogspot.com/2011/09/mangal-chandika-stotram.html”>http://ious

Also Brahmavaivarta Purana text is on archive.org

Latest update : September 5, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ श्रीमङ्गलचण्डिकास्तोत्रम् ॥

ॐ ह्रीं श्रीं क्लीं सर्वपूज्ये देवी मङ्गलचण्डिके ।
ऐं क्रूं फट् स्वाहेत्येवं चाप्येकविन्शाक्षरो मनुः ॥ २०॥

पूज्यः कल्पतरुश्चैव भक्तानां सर्वकामदः ।
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥ २१॥

मन्त्रसिद्धिर्भवेद् यस्य स विष्णुः सर्वकामदः ।
ध्यानञ्च श्रूयतां ब्रह्मन् वेदोक्तं सर्व सम्मतम् ॥ २२।
देवीं षोडशवर्षीयां रम्यां सुस्थिरयौवनाम् ।
सर्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम् ॥ २३॥

श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ।
वन्हिशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥ २४॥

बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितम् ।
बिम्बोष्टिं सुदतीं शुद्धां शरत्पद्मनिभाननाम् ॥ २५॥

ईषद्धास्यप्रसन्नास्यां सुनीलोल्पलल्लोचनाम् ।
जगद्धात्रीञ्च दात्रीञ्च सर्वेभ्यः सर्वसम्पदाम् ॥ २६॥

संसारसागरे घोरे पीतरुपां वरां भजे ॥ २७॥

देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने ।
प्रयतः सङ्कटग्रस्तो येन तुष्टाव शङ्करः ॥ २८॥

॥ शङ्कर उवाच ॥

रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके ।
संगत्रिं विपदां राशेर्हर्षमङ्गलकारिके ॥ २९॥

हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके ।
शुभे मङ्गलदक्षे च शुभमङ्गलचण्डिके ॥ ३०॥

मङ्गले मङ्गलार्हे च सर्वमङ्गलमङ्गले ।
सतां मङ्गलदे देवि सर्वेषां मङ्गलालये ॥ ३१॥

पूज्या मङ्गलवारे च मङ्गलाभीष्टदैवते ।

पूज्ये मङ्गलभूपस्य मनुवंशस्य सन्ततम् ॥ ३२॥

मङ्गलाधिष्ठातृदेवि मङ्गलानां च मङ्गले ।
संसार मङ्गलाधारे मोक्षमङ्गलदायिनि ॥ ३३॥

सारे च मङ्गलाधारे पारेत्वं सर्वकर्मणाम् ।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे ॥ ३४॥

स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम् ।
प्रतिमङ्गलवारे च पूजां कृत्वागतः शिवः ॥ ३५॥

देव्याश्च मङ्गलस्तोत्रं यः श्रृणोति समाहितः ।
तन्मङ्गलं भवेच्छश्वन्न भवेत् तदमङ्गलम् ॥ ३६॥

॥ इति श्री ब्रह्मवैवर्ते द्वितीये प्रकृतिखण्डे
नारद् नारायणसंवादे मङ्गलचण्डिका स्तोत्रं सम्पूर्णम् ॥

Prakruti-Khanda, BrahmaVaivarta Purana (Adhyaya 44 shloka 20-36)

Encoded and proofread by Prakash Ketkar
English and Marathi Translation and audio are at
http://ioustotra.blogspot.com/2011/09/mangal-chandika-stotramtml

Brahmavaivarta Purana text is on archive.org

.. Mangalachandikastotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*